# Lomashamunina Shakavikrayine Kritamupadesham

# લોમશમુનિના શાકવિક્રયિણે કૃતમુપદેશમ્

## Document Information

Text title : Lomashamunina Shakavikrayine Kritamupadesham

File name : lomashamuninAshAkavikrayiNekRRitamupadesham.itx

Category : misc, lakShmInArAyaNIyasaMhitA, upadesha, advice

Location : doc_z_misc_general

Proofread by : PSA Easwaran

Description/comments : lakShmInArAyaNIyasaMhitA | khaNDa 2 | adhyAya 247/83-100||

Latest update : February 28, 2026

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

February 28, 2026

*sanskritdocuments.org*

# લોમશમુનિના શાકવિક્રયિણે કૃતમુપદેશમ્

સુખઃદુખે સમે મે સ્તો ન હિ મે સ્તઃ પ્રિયાઽપ્રિયે ।
એવં ધર્મં પાલયધ્વં જનાસ્ત્વભયદાનકમ્ ॥ ૮૩॥

તેન મુક્તિમવાપ્સ્યન્તિ ભવન્તોઽભયવર્તનાઃ ।
નારાયણો હિ ભગવાંસ્તેન તુષ્યતિ સર્વદા ॥ ૮૪॥

નમો બ્રાહ્મણયજ્ઞાય નમઃ પ્રજાધ્વરાય ચ ।
નમઃ સેવાપ્રવીણેભ્યો જનેભ્યશ્ચ નમો નમઃ ॥ ૮૫॥

સુકૃતેન સુહવ્યેન દેવાસ્તુષ્યન્તિ સર્વદા ।
નમસ્કારેણ હવ્યેન સ્તોત્રેણ હૃદયેન ચ ॥ ૮૬॥

યજ્ઞાહુત્યા સુસન્તુષ્ટા આદિત્યા વર્ષયન્તિ હિ ।
તતઃ સસ્યરસાન્નાનિ તેભ્યઃ પ્રજાપ્રવર્ધનમ્ ॥ ૮૭॥

પ્રજાઃ કુર્વન્તિ યજ્ઞાંશ્ચ બ્રહ્મ તુષ્યતિ તત્ર ચ ।
બ્રહ્મતોષકરા ભક્તાસ્તોષયન્ત્યપરાનપિ ॥ ૮૮॥

તસ્માદ્ભક્તિં પ્રકુર્વન્તુ સર્વં યદ્બ્રહ્મદૈવતમ્ ।
બ્રહ્મતૃપ્તૌ જગત્સર્વં તૃપ્તમેવ ન સંશયઃ ॥ ૮૯॥

યજ્ઞે તૃપ્તાઃ સર્વદેવાઃ સ્યુર્યસ્ય બ્રહ્મતર્પણમ્ ।
તસ્ય પ્રજ્ઞાનતૃપ્તસ્ય નિત્યતૃપ્તિઃ સુખોદયા ॥ ૯૦॥

ધર્માધારા ધર્મોદયા બ્રહ્મધ્યાનપરાશ્ચ યે ।
ભક્તિવિજ્ઞાનસમ્પન્નાઃ પરં પારં તિતીર્ષવઃ ॥ ૯૧॥

સર્વસ્થિતં પરબ્રહ્મ દૃષ્ટ્વા લબ્ધ્વા વિચાર્ય ચ ।
પુણ્યાત્પુણ્યતમં સ્થાનં પ્રાપ્નુવન્ત્યક્ષરં પદમ્ ॥ ૯૨॥

યત્ર ગત્વા ન શોકોઽસ્તિ ન વ્યાવો ન વ્યથા મૃતિઃ ।
નૈતાદૃશાનાં સ્વર્ગાર્થં યજનં વા યશોઽર્થકમ્ ॥ ૯૩॥

સતામાચરરૂપં તદ્યજનં દ્રોહવર્જિતમ્ ।
બ્રહ્મતૃપ્તિપરં સમિદોષધિફલમૂલકૈઃ ॥ ૯૪॥

સ્વર્ગાર્થં પુણ્યમેવાસ્તિ નૈર્ગુણ્યં મુક્તયે ભવેત્ ।
તદહં હૃદયે કૃત્વા નૈર્ગુણ્યં ત્વાચરામિ વૈ ॥ ૯૪૯॥

અન્યે યજન્તિ યજ્ઞેષુ સ્મૃદ્ધ્યર્થં કૃતનિશ્ચયાઃ ।
તેન તે દેવયાનેન યથા યાન્તિ દિવં પુનઃ ॥ ૯૬॥

આવૃતિં તેઽભિગચ્છન્તિ નાઽઽવર્તન્તે તુ નિર્ગુણાઃ ।
સ્વયં યૂપાનુપાદાય યજન્તે સ્વાપ્તદક્ષિણૈઃ ॥ ૯૭॥

પુનઃ સ્વર્ગં પુનર્ભૂમિર્ભ્રમાવર્તો ન લીયતે ।
તસ્માદ્ભવન્તુ વૈ બ્રહ્મયજના નાન્યયાજિનઃ ॥ ૯૮॥

બ્રહ્મ વૈ દૈવતં કૃત્વા યજ્ઞે મોક્ષં પ્રયાન્તુ ચ ।
આત્મતીર્થે મખં શુક્લં કુર્વન્તુ દિવ્યભાવનૈઃ ॥ ૯૯॥

એવં કૃતોપદેશશ્ચ શાકવિક્રયકો વણિક્ ।
સર્વસેવાપરો નિત્યં ચાભજત્ પુરુષોત્તમમ્ ॥ ૧૦૦॥

ઇતિ શ્રીલક્ષ્મીનારાયણીયસંહિતા । ખણ્ડ ૨। અધ્યાય ૨૪૭-અધ્યાયાન્તર્ગતં
લોમશમુનિના શાકવિક્રયિણે કૃતમુપદેશં સમ્પૂર્ણમ્ ।

લક્ષ્મીનારાયણીયસંહિતા । ખણ્ડ ૨। અધ્યાય ૨૪૭/૮૩-૧૦૦॥

lakShmInArAyaNIyasaMhitA . khaNDa 2. adhyAya 247/83-100..

Proofread by PSA Easwaran

*Lomashamunina Shakavikrayine Kritamupadesham*
pdf was typeset on February 28, 2026

Please send corrections to *sanskrit@cheerful.com*